# Shri Nrisimhakarunarasa Stotram

# શ્રીનૃસિંહકરુણારસસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Nrisimhakarunarasa Stotram

File name : nRRisiMhakaruNArasastotram2.itx

Category : vishhnu, dashAvatAra, stotra, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa. pancharAtrAgama

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહકરુણારસસ્તોત્રમ્ ૨

શ્રીનૃસિંહાય નમઃ ।
યાચેઽહં કરુણાસિન્ધો યાવજ્જીવમિદં તવ ।
અદૈન્યં દેહદાર્ઢ્યં ચ ત્વત્પાદામ્બુજસદ્ગતિમ્ ॥ ૧॥

અનાદ્યનન્તકાલેષુ ભૃત્યોઽહં ત્વં હિ મે પ્રભુઃ ।
ત્વં તુષ્ટોવાથ રુષ્ટો વા ત્વાં વિના મે ગતિર્નહિ ॥ ૨॥

તુષ્ટોઽસિ ત્વં દયાસિન્ધો કિમન્યૈર્મમ રક્ષણે ।
રુષ્ટોઽસિ ત્વં દયાસિન્ધો કિમન્યૈર્મમ રક્ષણે ॥ ૩॥

દોષાણાં ચ સહિષ્ણુત્વે ત્વત્સમો નાસ્તિ ભૂતલે ।
મત્સમો નહિ દેવેશ કૃતઘ્નો વઞ્ચકોઽપિ વા ॥ ૪॥

પ્રસિદ્ધશુક્લદાસોઽહં શશ્વત્તવ જગત્પતે ।
કિં ભયં કિમુ મે લક્ષ્યં સર્વેષ્વપિ ધુરન્ધર ॥ ૫॥

ઈશસ્ય પૂર્ણકામસ્ય કિમસાધ્યં વદાચ્યુત ।
મમેષ્ટં ચ કિયન્માત્રં કિમેતાવદ્વિલમ્બનમ્ ॥ ૬॥

જગત્સ્વામી કૃપાપૂર્ણઃ સમ્ભવેન્નિર્દયાપરઃ ।
કા તદા ગતિરસ્માકં ગરદાયાં સ્વમાતરિ ॥ ૭॥

ત્વમેવૈકો જગત્રાતા દાતા જ્ઞાતા દયાન્વિતઃ ।
ત્વાં વિના કઃ પુમાન્કર્તા હ્યસ્માકં તુ મનોરથમ્ ॥ ૮॥

ઉદારગુણશીલસ્ય સામ્યં સર્વત્ર વૈ તવ ।
કસ્માલક્ષ્મીપતેઃ શ્રીમન્ મયિ લોભઃ કિમીદૃશઃ ॥ ૯॥

આર્તબન્ધુરિતિ જ્ઞાત્વા ત્વામહં શરણં ગતઃ ।
રક્ષ માં અથવા સમ્યક્ ત્વં યશો મુઞ્ચ શાશ્વતમ્ ॥ ૧૦॥

દીનબન્ધો દયાસિન્ધો સુહૃદ્બન્ધો જગત્પતે ।

સંસારાર્ણવમગ્નં મામિન્દિરેશ સમુદ્ધર ॥ ૧૧॥

શ્રીનૃસિંહ દયામૂર્તે મય્યાર્તે નિર્દયાકૃતા ।
કો ધર્મઃ કિમિદં ભાગ્યં કિં યશો લોકવિશ્રુતમ્ ॥ ૧૨॥

સુકૃતીનાં મદીયત્વં કરોષિ ત્વં કિમદ્ભુતમ્ ।
તત્કૃતં ચેન્મયિ હરે તદૈવ વિપુલં યશઃ ॥ ૧૩॥

નિર્ગુણેષ્વપિ સર્વેષુ દયાં કુર્વન્તિ સાધવઃ ।
ન હિ સંહરતે જ્યોત્સ્નાં ચન્દ્રશ્ચાણ્ડાલવેશ્મનિ ॥ ૧૪॥

પ્રસીદ મે શ્રિયઃ કાન્ત સુપ્રસીદ દયાનિધે ।
પુનઃ પુનઃ પ્રસીદ ત્વં પ્રસીદં વરદોભવ ॥ ૧૫॥

ઇતિ શ્રી પઞ્ચરાત્રાગમોક્તકરુણારસસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Shri Nrisimhakarunarasa Stotram*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*